शारस्वयमितिसैनेवनामेनवस्त्रतो द्वितीयाभावादित्यर्थः ननु निजबन्धनेन न कश्चित्प्रवर्ततेसर्वस्य स्वात्म नः
प्रेमास्पदत्वादित्याशंकयाऽन्याहृतंतदृशनेनबोधयतियथेतिऊर्णनाभस्तन्तवायः निजदेहान्निर्यातितन्त
नासयमात्मानंबध्नातितथेत्यर्थः स्वेनैववशीकृतोदेहादिरागएवप्रतिबन्धोयमस्तीतिभावः वासिष्टे देहभावन
यादेहोघटभावनयाघटइति नतु तं दृष्ट्वा आत्मस्तुतं कं कथं भवतो विदितं तदित्यत्र कार्यानुमानेन ज्ञात्वमाह य

वि स सनेति अतः अस्मात्कारणात् कामक्रोधादिदुःखदारिद्र्यदुस्तिपासादिविपदां समुद्भवः तामेव निजवन्धक
टी र्तारं वाञ्छति प्रियतेनाकांक्षयति काम्यकामीहृक्षतिः सम्भवतीति भावः व्यसनं व्यपदिश्ये शरणमरः ननु तथा
२९ पि हरिचरणारतिः क्वचिज्जायते न जायते तत्र को हेतुस्तत्राप्याह यामस्तीति यथोक्तविपद्भ्रः कदाचिद्विमोचनं न
39 भवति कथं हरिचरणयोस्तवरतिर्भवेत्तद्विशुक्तावसराभावादिति भावः भागवते नेतन्मनस्तवकथासु वि
कुण्ठनाथेति ८। ननु कश्चिदेतेषां विरताउपायः स्यादस्ति किन्तु तत्कर्तुं प्रवर्तेयदि तर्हि कांचन निर्वपि
सत्वसम्पदो वांछन्ति नामितमाशयमाह। आसृष्टेर्विविधभवाद्यहारिणस्ते भक्त्यैव विमलहरेहरेर्निमज्ज
तश्चाश्रोषितपरतत्त्ववोधरत्नं दारिद्र्यं व्यसनमयं कदा न ते स्यात् ९। हरेः भक्तियोगेन तैर्जनैस्तं जिज्ञासतनोद्दुर
वगमतत्वलब्धयेमायया सीक्षनचिन्मूर्तेः ननु परवोधेयान प्रतिबन्धस्य विरामयमन्तरेण तन्नशक्यमपि गन्त्वे
तन्मूर्तिग्रहणोकिमिमाशंक्याहृदिशद्वैनेवतद्विरतिं साधयति आसृष्टेरिति नाहमेकाकीरमेयकोहं बहुःस्या
मिति सृष्ट्यादर्शितमीश्वरसर्जनसंकल्पमभिव्याप्य विविधभवेषु नानायोनिषु संभूतानि यानि हरिविस्मृत
मितिं त्वमहमतेमे रूपाये रित्यादानि मूलपापानि दुष्टानामपि हरतीति हारीन तस्य कायवाङ्मनोभिर्हरितत्त्वविमर्श
दसारसमन्नवेदविषयेभ्य उत्यापित प्रेम्णोतिशयेन भजनं सर्वसंघातान्तरीनस्य हरेरन्तर्यामित्वेनपरामर्शश्च
ग्रत्नं भक्तिः सेवशमदमादिरत्नाधारत्वात्समुद्रस्तत्र निमज्जनि तरां तदनन्तिकवासनालेशं यथा भवसि तथा

तिष्ठत्यर्थः किंलक्षणः सतत्राह विमलहरेरिति मायाकलितविश्वतेजसप्रातानन्तदभिमानकालिम्नो
निवर्तकेत्वालक्षितरीत्यर्थः ततः किमतआह तत्रेति भक्तिसमुद्रप्रवेशानन्तरे परतत्त्वस्य सर्वोत्कृष्टतत्त्वस्य
निष्प्रपञ्चपरमार्थस्याखण्डैकस्वभावत्वात्पारिस्पन्दात्तं तं पदार्थावशिष्टवस्तुबोधो बोधरत्नमनर्घ्यमनन्तवेद
नं स्वप्रकाशकत्वाद् रत्नं प्राप्तोऽपि स्वात्मरूपतया प्रलभसे भक्तामामभिजानातीति यावान्यश्चास्मि तत्त्वतः त
तो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति गीतास्वनन्ततदपि गम्याकार्थसिद्धिर्भवेदित्यत्राह दारिद्र्यमिति
व्यसनमयं सर्वविपत्स्वरूपमात्मसंकोचात्मकमनात्मकदा न स्यात् परसंविदि विमलतमपूर्णबोधस्य परि
निष्ठितसंपदा निर्भरत्वात्तदतिरिक्तं किञ्चिन्न भवितुमर्हतीति येन संकोचो भवेद् ज्ञबोधे सति तदारोपितस्यापेव
दिति भावः आत्मबोधे तीर्णा मे हार्णवं हत्वा कामक्रोधादिराक्षसान् योगीशान्तिसमायुक्तः आत्मारामो विरा
जत इति ९। ननु कामाद्युक्तिर्यथा वीजनिद्रा निर्हारा स्थितेय यथा शून्यवस्त्वनिसं तस्य मनसः देहोपरोधात्पू
र्वकर्मफलोदयेनामानामिष्टानिष्टसाधनानां हर्षामर्षप्रात्मकफलानि तत्बाधनेयथार्थसंविदो वेदोऽपक
रत्स्वपर्वे विध्यत्तानोपमर्दत्वादिति नामाचष्टे। मायाव्याजितमिदमात्मनीति मत्वा सद्भावैर्धीरतधिया निषि
ध्यमानत्वम् शिष्टेवस्तनियतयो लयं न्यपन्ति तं सर्वाशयनिलयं हृदि भजेथाः ११। इदं देशकालाकारैः परि
मितत्वान्नवनवविचित्ररचनानिर्भरं जगत् सर्गस्थित्यादिकार्यकारणात्मकगुरुभेदभाजि धराद्यवाकुलतानन्तं विश्वं

वि॰ प्र॰
टी॰
४०
40

आत्मनिसर्वधर्मशून्यत्वादाकाशतोपिसूक्ष्माच्छून्यतमेचिदानन्दमात्रतामवलयोदयितोपिशर्णीत्स्वर्णीतमेयशा
न्नमायैवब्रह्मणोमाययापुंस्त्विश्वप्रकाशसंवृत्त्यास्वपरभेदकलनाकारयाव्यञ्जितंतत्त्वानभिज्ञानामितरेतरा
विवेकेनप्रकटितंभ्रान्तदृशांव्योम्निभिन्नोगन्धर्वपुरचित्रमिवेतिमत्तोब्रह्मणःइन्द्रोमायाभिःपुरुरूपईयतेइत्यादि
वाक्यैर्मायासत्तांसन्निश्चिनोतिरहस्योपदेशवाक्यैःकरामलकवन्निश्चित्यसद्वाक्यैःजगदसारत्वप्रतिपादकैःकर्मवि
तोलोकःक्षीयतएवमेवपुण्यचितोलोकःक्षीयतइत्यादिवाक्यैरस्मान्मायाभासाद्देयवर्गाद्विरतोथीस्वयाहन्त्वं
मायाकल्पितमिन्द्रजालवत्सर्वंविकारजातंनिषिध्यथातत्त्वादेशोनेहनानास्तिकिञ्चननतस्यकार्यंकरणं
चविद्यतेवाचारम्भणोविकारोनामधेयमित्यादिवाक्यैःसतिविप्राण्यशिष्ट्वापितृह्यात्मविषयावसानान
स्माद्व्यवस्थितेःसर्वंज्ञानमनन्तंब्रह्मेत्यादिसत्यैर्वाक्यैःवस्तुनिपरमार्थचिन्तनेयत्नतःआत्ममननादिप्रयत्न
शीलाःसर्वतोबाह्याभ्यन्तराकृतसमासाःलयंजलेजलमिवक्षीरेक्षीरमिवैकरसंजग्मुःनसपुनरावर्तत
इत्यादिसद्वाक्यैःश्रमयन्त्येषलिव्रतंहरिमपरुतमायोल्लासितनिःशेषप्रपञ्चंकूटस्थचिद्देवंसर्वेषांघटादि
देहान्तानांपदार्थानामाशयाश्रमभियायद्रूमयपवनिलयप्राप्त्ययोयस्मिन् जगज्जीनांहृत्सीनामन्तश्चिन्मयतयासर्वे
षामध्यस्तएवहरीर्निन्नपरोलोविमर्शज्ञघांतत्तामविहायविमर्शयितुंशाकःस्वात्मस्वरूपत्वानन्यत्वदादिवत्स्व
तोभिन्नत्वतएवभजेयाःतद्विमर्शप्रतिबन्धदेहाद्यहंप्रत्ययबलिविधानेनशत्रुजयस्वतन्त्रोनिर्माणान्तपरमभवसि

तदानकस्यार्थस्यापि वर्णितत्वेत्वा निजानन्दलाभत्वमत्वादिति भावः भागवते आत्मारामाश्च मुनयो निर्ग्रन्था
अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति ११। नन्वत्रोदयरूपस्य ब्रह्मणो शरीरत्वाभिमान
मशकादिसदृशवाद्ब्रह्मणः स्वरूपे मूर्तामूर्ते इति श्रुत्यादेः स्वरूपेऽपि कारणतावत्त्वेन शुश्रूषूणां चित्तप्रवेशाप्र
काशितेन तयोर्भवता प्रणीतेन लक्षणस्य स्वरूपे निष्ठामलभमानस्य मम किं निर्णयमिति तत्र तस्याप्रवे
शायापादमस्तकान्तं यावत्क्रमणिकाश्र्विकांस्थलयाचरणांबकुमारभमाणस्तत्र प्रथमं श्रूयतमयोर्ब्रह्म
रुद्रादीनामपि शुश्रूषुजनध्यानगोचरत्वाच्चरणकमलयोर्लक्षणानि वर्णयति। संसाराम्बुधितरणे विष्णोः
पदाब्जे येऽपि पंकजकुलिशांकुशध्वजाद्यैः भक्तान्तर्ध्वरशमभेदशैलभंगमोहेभावहननजयक्रियेः सदी
मे १२ यस्मातीन्द्रियवपुषो रमातलस्यायत्र स्वार्थतः उरसावतीर्य साक्षात् ब्रह्माद्यैर्विपुलभगैरुपास्यमाना
देवौघैः सहजकृपाकटाक्षमोति १२ ॥ यस्मेन्द्रियेभ्योऽतिक्रान्तमतिहूस्वभूसच्चिदानन्दस्वरूपं यस्य रूपपरा
हित्याकरणेशाकागोचरस्यानुग्रहात्स्वजनकृपातिरेकत्वात्स्वेच्छागृहीतशरीरस्य पादाब्जे चिन्तनमात्रेणावता
पत्रयापहारके चरणकमले तदेव स्पष्टयति संसार इति जननमरणादिरूपः कालप्रवाहः सएवानेकदुःखे
संकुलत्वादपारावारस्तस्मिन्नम्बुधिस्तस्मात्तरणमिच्छन्ति तेषां शुश्रूषूणां ध्येये तद्धितयेसारग्राहिणाप्रज्ञाचि
न्तनीये भागवते यस्मिन्नुतेन्नर्दादिभावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशादिति नन्वतयोरस्मै यः कोपि

वि प
टी
५२
५१

शेषत्वमाह पंकजेतिपद्मंकुलिशंवज्रंअंकुशंसृणिःध्वजंपताकातेषामंकैःचिन्हैःप्रदीप्तिमेशोभमाने भा
गवते संचिन्तयेद्भगवतश्चरणारविन्दंवज्रांकुशध्वजसरोरुहलाञ्छनाढ्यमिति ननुतत्रतेषामस्तित्वेनकिं
फलमुपासकानांतदाह भक्तानामितिहरिचरणमनन्यप्रेम्णान्नुवतांयोन्तर्ज्वरआध्यात्मिकादितापत्रयस
न्तापस्तस्यशमःनिर्वाणमेवक्रियाकर्मयस्यपद्मस्यभेदस्तमहमितिद्योतिरेवचिराभ्यासाद्दृढीभूतशैल
त्वस्यभंगग्रामर्दनंक्रियायस्यकुलिशस्य मोहःस्वात्मामोहनंसएवश्रभःप्रमत्तगजस्तस्यावहनंवारणंनेक्रि
यायस्यांकुशस्य सर्वेषांकामादीनांजयएवक्रियायस्यध्वजस्यचैतैः ननुचरणयोरधिकंमहत्वंवर्णितंतत्र
किंप्रमाणंतत्राहरमेति विपुलःतदंशसयोगोपासनादिकारिणांप्रयत्नातिशयेनलभ्यमानाद्विस्तीर्णः
भगऐश्वर्ययेषांताद्दशैर्ब्रह्माद्यैःदेवौघैःसहजायाअकृत्रिमायाःस्मरद्विरूपायाःकृपायाअनुकम्पायाःक
टाक्षमोक्षेप्रणांगपातार्थउपास्यमानासतार्पणतयासेव्यायारमाजगदाश्रयालक्ष्मीसातान्यस्त्वंउरस्
वक्षस्थलादवतीर्यप्रवरुत्वयज्ञचरणयोर्मध्येत्वलस्यासहस्पर्धते अहमेवतिष्ठामीति योनःप्रणयेनसंध
यते भागवते श्रीर्यत्पदाम्बुजरजश्चकमेतुलस्यालब्ध्वापिवक्षसिपदंकिलभृत्यजुष्टम् यस्याःस्ववीक्षणा
हतेन्यसुरप्रयासइति प्रतत्त्वएवत्वयाचिरमलस्त्रुद्वयेविमृश्यैसारत्वात्सर्वत्रशतिभावःतंशरणंत्सत्वजल
यिमिति श्लोकोत्तरार्धेनसहसम्बन्धः १२ १२ । यत्कसौमणिरचितास्वर्णकांचीवर्धाध्रेयत्पुरिवभास

पंकोद्यपाक

नेमस्त्रोतः शेषांगान्तरशायितस्य यस्य नाभेर्वेदोद्दिष्टपतिलोकपद्मजन्म १३। यस्याः शरीरस्य कस्तांश्रो
णीमणिरिव विनाश्रनर्घ्यरत्नैर्भविनास्वर्णकांचीहेमरशनाभासते यथा वर्षाश्रेवर्षाकालमेघमध्ये नरेंद्र
चापधनुः विविधवर्णरचनासुन्दरश्चापो मनोहरत्वाद्भासते तथैवेत्यर्थः यस्य जगद्बीजप्रथमावतारस्य शे
षवपुषोन्तरे मध्ये शायितस्य योगनिद्रयानर्यानन्दसामरस्यमासस्य नाभिविवराद्देदृशकमनीयवपु
र्विधिः ब्रह्मापतिरधिकारी यस्य लोकपद्मस्य चतुर्दशभुवनात्मकस्य महाब्जस्य जन्मउद्भवो विद्यते येतन
मायास्वीकृतवपुषो जगत्कारणत्वं स्वीकार्यमिति भावः १४। श्रीवत्सो यदुरसि कौस्तुभो रमा च भान्ती
वार्यमविष्णुविभुर्नो मिथोधे यस्यांसे सजलपयोदचीव विद्युत्पुंजैवलसति हवर्णपीतवसनम् १५।
यदुरसि यस्य निरवयस्य वक्षःस्थले कदाचित्कुंठमारुह्यैन भृगुमुनिना श्रुद्धसत्वधर्मात्मकत्वमावीत
णाय निजास्तेनेशायितस्यैव भगवतो वक्षसि सक्रोधं पादो दत्तस्ततस्तेन तस्य संवाहनकर्मणा प्रीणितो
मुनिः हे प्रभो कठोरेण मम वत्ससरोजदलवन्मृदुपादस्पर्शामभूदिति प्रेमवचसा च तदाप्रभृति
निजभक्तवात्सल्यदर्शनाय तत्संज्ञको वैकुंठनाथस्य स्तनमानिधेर्वत्सोस्ति श्रीवत्सनामलक्षणं विराजत इति
पुराणोक्तप्रसिद्धं कौस्तुभो नाम मणिः भक्तिभाजां जीवब्रह्मणोरेकत्वबोधायिगमाय निजवक्षसिस्थकादि
नेभगवता कौस्तुभात्मनाशेषान्तर्गतं शोधितप्रत्यगात्मतत्वं विश्वप्रमाणं शान्मानमस्य जगतो निर्लेप

चि॰ प्र॰ टी ४२

मत्प्रणाशयत्म् विभर्तिकौस्तुभमणिस्वरूपं भगवान्हरिरिति रमा च शमदमादिभिर्विवेकोपायैरशेषहृदयेषु व
हिरन्तरधिगतचिदाकारहृल्लीनां नरश्रेष्ठं भगवानात्माशयेषु रममाणा चिल्लक्ष्मीः सैव सुखं भक्तानां ध्येयतया ग्राम
येनिजोरसि सर्वसौन्दर्यबीजभूतया साकारमूर्त्या प्रकाशिता एतेनयोगसनिरवयवस्यवक्षःस्थले विभाति
प्रत्यक्षभूतोपमयादृष्टान्तमाह स्वर्यमाणस्यः विडम्बन्दः विद्युल्लतायथा मिथ्यैर्युगपदभ्रेऽत्राकाशे भान्तिय
दानदातत्साम्यमेभिर्भगवद्वक्षसा स्तुयादतो लौकिकंभगवद्वपुरितिभावः यस्यपरिच्छेदशून्यतनुत्वस्य
सेस्कन्धेस्तवर्णिकसंपीतवस्त्रं नीरनिर्भरपयोदान्तेविद्युत्संजमिववैनिःश्रयेलसतिश्रेयेण प्रकचति
१५। भक्तान्तारिपुगणसंतयोदिताः स्युः शंखाद्यायुधनिवहाभुजेषुयस्य मंजीरांगदकटकोर्मिकादिहे
मालंकाराय दवयवावलोकयन्ति १६। हे विभयस्यामूर्तस्य भुजेषु चतुर्वाहुषु भक्तानां भगवन्मूर्त्युपास
कानामन्तःहृदये ये रिपुगणाः कामक्रोधादिशत्रुसमूहास्तेषांसंतयमूलकर्तने उद्यताः सज्जिताः
शंखचक्रादिरायुधानां तेषांनिवहाः समूहाः स्युः विलसन्ति यद्यत्स्वरूपंममैतज्जवेनान्तरितान्निलम्
चक्रस्वरूपंचमनोपत्रेविलसःकरेस्थितम् बुद्धिमेवजगन्नाथो गदारूपेणमाधवः भूतादिमिन्द्रियादिंच
द्वियाहंकारमेवच विभर्तिशंखरूपेण शार्ङ्गरूपामहंकृतिम् विभर्तियश्चासिरत्नमच्युतेऽत्यन्तनिर्मलम्
विद्यामयंचतज्ज्ञानमविद्याचर्मसंस्थितम् इतिकथं पुनर्ध्येयत्वेन हृत्स्थिताङ्कपिते भगवन्मूर्तिस्थितेः शं

त्वाद्येतत्सजातीयानां भक्तान्तर्वर्तमानानां मनोहंकारादीनां निवृत्तिरित्युच्यते रजस्तमोरूपयोरविद्यां
शयोस्तत्कार्ययोश्च विद्यारूपेण तद्देशशुद्धसत्वेन तत्कार्येण च मिथो विरोधाद्व्यावृत्तिर्भवेदित्यर्थः
भगवता रजस्तमश्चाभिभूय सत्वं भवति भारतेति वासिष्ठे च विद्यांशस्याश्रेष्ठत्वात्तालयमिव हृतिरिति
मलं मलेनापहरंस्तु क्षिप्तोरजं केयथेति यस्याभवस्य अवयवानामंगानामावलीपंक्तिर्मंजीरानूपुरा
अंगदानि केयूराणि कटकावलयाऊर्मिका अंगुलीयकान्यादयो येषां हेम्नालंकाराणामाभरणानि तैः नां
वल्ति चकासन्ते ११ । गुंजत्षट्पदवनमालया परीतो यत्कण्ठे विलसति शुद्धवैजयन्ती भूषाद्यैर्विम
लचिदेव यस्य मूर्तौ संस्पर्शनात् शिशिरजलं हिमात्मनेव १२ । गुंजन्तः मधुरतरप्रेमरसस्मृतया गिरावि
हए मलतमभगवद्यशोकूजन्तः षट्पदाः भ्रमरा विश्लेषासहाये भ्रमरमूर्तिधारिणः सनकादयो मुनयः यस्मा
पञ्चरूपमय्यो वनमाला यां तया परीते व्याप्ते यत्कण्ठे यस्य निराकारस्य गले शुद्धवैजयन्ती निर्मलाचर
णपर्यन्ता स्रक्माला विलसति भासते नत्वकेन शिल्पिना मीभूषणादयो निर्मिता इत्याशंक्याह यस्य
प्रकाशानन्दविग्रहशालिनस्य मूर्तौ भक्तानुकम्पयात्तशरीरे भूषाद्यैरलंकाराद्युथादिभिर्विमलचिदेव प्र
पंचमलिकाप्रणीचित्स्वगतादिभेदनिराकरणार्थमेवशब्दः संस्पर्शनात् साकारमूर्त्यापिण्डीभूता
तद्रूपं गीतासु अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममा

यथेति अन्वयोक्तं विद्वनोपि जगन्मूर्त्यावरणानीयः परमेश्वर इति कथं तद्दृष्टान्तेनाह यथा जलं शिशिरांशोर्दि
मात्मनाप्रहारःसमन्तवारहूपेणावरणीभवतितथेत्यर्थः ९। विभ्राजन्मुकुटफणाभकुंडलविट्संरक्ता
लकविवराङ्कवक्त्रकपोलात् नम्रामर्त्यभ्रुधिपरिशोषणान्नवायोर्यदृक्कान्त्यस्मरतिकोटिभानुभातिः १०।
विभ्राजतः विस्फूर्जतः मुकुटस्य किरीटस्य फणाशोभिमकराकाराणां कुंडलानां च विषादीमासंरक्ताना
माच्छुरितानाम् अलकानां कुन्तलानां निवहो यत्र तादृशात् कचन्तौ कपोलौ यत्र तादृशात् नम्रापि कोप
प्रक्षिरनेन विरक्तस्य तत्क्षमदृष्टान्ते विशेषणमाह नम्राणां कायवाङ्मनोभिर्भगवन्मूर्तौ वर्पितानां पुरुष
वर्याणां याश्चतुर्णय इष्टानिष्टसंयोगवियोगरूपानानापीडास्तासाम् अमितत्वात् सम्रुधिरस्य परिशोषणाद्दुःख
मयजलस्य नेसम्पादने मन्तवायोः प्रलयानिलाघदृक्कान्त् यस्या मूर्तेः स्मरणवारविन्दाकोटिभानुभातिरवि
नत्वर्यप्रकाशः प्रसरति निर्यातितन्डक्तं सूर्यकोटिप्रतीकाश इति १०। कामः संचलति विवर्तनेन यन्नुचा
पस्याविलजनगर्वहरादृश्चात् संस्मर्तॄर्जनतिमृतिनीरधिंमितीर्षा हेलोपघट्टघुलतुज्जापश्चर्यपाशाक्षं
११ यस्याक्रियाविप्रकसन्नपत्रघाविवर्तनेन वकृतानिर्मितास्रविलानां जनानां ब्रह्मपर्यन्तानां जीवानां
गर्वहृषीकजेरनाभिमानेहरतियोब्रह्मलेन्द्रचन्द्रानामगम्यागमनवान्कामः कन्दर्पजन्मसमत्वदनावविष
मानन्दुःखमयसमुद्रं तितीर्षा ललनमिच्छतः संस्मर्तुस्तडपरानिरतेनमेवच्छेदितिविश्वासेन भगवन्मूर्तिं चिन्त

स्थितस्तन्ममभक्तस्य हृदयपुंडरीकात् संचलति चक्रस्य पश्चादागमनशंकया [illegible] विहिंस्यात्किं न त्वमतः
त्वर्थः तत्र निदर्शनमाह हस्तेति यथाकरोद्धृतस्थूलकठिनदंडस्य कोऽपि कृपाणस्य गर्वादिः शीघ्रं ताडन
शंकया संचलति तथेत्यर्थः नहि मत्तद्भक्तेराविर्भावाद्धृज्जस्त्वमोह निर्हृदयस्य त्वात्क्षणे वस्त्रमतिचंडालस्येव
स्थितिर्भवतीति भावः १९। यस्मात्सा विलज्जयमनमोहस्तुव्यक्रोधाद्याहितविजयध्वजं प्रसूतेः स्मार्तोत्र
यहारमस्मरणीमप्रमपत्रेयस्मै त्रैमदनमदापहारकेच २०। प्रसूते जन्मादिसंकटान्मुक्तिमिच्छोः यस्य निरा
कारस्य नासिकाग्रविलानां जीवानां जयेन वशीकरणे नमनः पदपष्कस्यासौ यो मोहो निजानंदरंगतभगवन्
त्प्रमोघः स एव प्रसूत्वे प्रायो येषां क्रोधादीनामेवाहितानां शत्रूणां विजयस्य ध्वजं पताकावर्तते तेन सा प्रवित्त
नारोहमार्गेणैव सर्वे पलायन्त इत्यर्थः यस्य सा तितमस्य नेयेप्रार्तानां संसारतापार्दितानां तत्प्रशमपटुर्यो
नुग्रहः स एव रसो मकरन्दस्तेन शोभितेति पद्मपत्रे मदनस्य कामस्य सौन्दर्यप्रादुर्येण सर्वजेतृत्वाभिमा
नमपहरतस्ते भागवते सातान्मन्मथमन्मथ इति २१ भगवतो निखिलविश्वमंगलमंगलात्मकं समग्र
मूर्तिध्यानमाह। आसर्गात्प्रकृजनिष्टुमनरष्ट्रणपयीनशोभितवरलब्धमतन्नदिष्टा कामादिव्ययविलयेषिणां
त्वप्रसाद्यन्मूर्तिः सजलघनरुचिविस्तमोघ्नी २२। कामकर्मा विद्याश्रयस्य संतयसेषणाशीलानां समति
मतां पुरुषश्रेष्ठानां सर्गमभिव्याप्य पुरुजनिषु शोभितनानाजन्मसहस्रैरादरातिशयेन सम्यगेव स्पष्टोपे

वि स निष्कामकर्मार्चनादिनिर्णिक्तसत्कृतेः प्रीतेन प्रसन्नेनेशेन कारणेन नियन्तृभावाद् शोभनशुभाशुभकर्मफलदा
टी० त्रा ईशिताद् अस्मादुपलब्धैस्तैस्तैस्तत्त्वप्रत्ययवद्भिः दिष्टा करामलकवत्स्फुटं दर्शितानीत्यनिर्भरमेवस्मरणमा
४४ यस्याकाशवत्सर्वगतस्य मूर्तिः घनीभूतविमर्शप्रकाशमयी तमोऽज्ञानाविद्यान्धकारहन्त्री २१। संनम्राखि
लजनतीव्रशोकबाष्पाम्भोधेः शोषणे चतुरा मूर्तिर्हि यस्य तं शरण्यं सत्त्वजलधिं निराकृतिं त्वं ध्यायस्व स्व
जनहितेच्छया मूर्तिम् २२। यस्य वाङ्मनोतीतस्य स्मृतिः मूर्तिध्यानं संनम्राणामनेकसंकटादुत्तकेन तरा
नालोचनेन रागादिभिः सर्वोपायस्य भगवन्मूर्तिमापन्नानां जन्ममरणदुःखपनन्त लक्षणानां तीव्रम सद्यच्छो
कबाष्पं तस्याम्भोधिस्तस्य शोषणे चतुरा परानन्दवितरणे धर्मत्वामदिकृतिदत्ताः तितं सार्थदशापन्नेषु सा
कारस्वरूपाकीर्तितत्तत्त्वं तस्य वस्तुस्वरूपमाह शरण्यमिति अथैवं साकारत्वमाकाशवत्सगुणनिर्गुणभेद
स्वरूपं स्फूर्तिः शरण्यमिदं शरण्यमदश्चेति ननु शरण्यस्य सर्वमयत्वेनानिश्चिततत्त्वाद्यथाश्रुतवस्तुन्येवेयमित्या
शंक्याह सत्त्वजलधिमिति मानुष्यानन्दादिशतशतगुणोत्कृष्टहिरण्यगर्भानन्दानन्तशीकरायितमहा
र्णवं भाष्यकृता अतत्र्यानन्दसमस्तो यस्यानन्दलवाश्रिताः ब्रह्माद्यास्तारतम्येन भवन्त्यानंदिनोऽखिला
इति ननु करपादादिमान्योऽदृश्यमानाद्भुतवदनिश्चः सत्यति ध्याना कथमस्य शरण्यत्वसत्त्वजलवेत्यान्तामित्याशंक्य
न तस्य मायाकृतामिति सूचयति निराकृतिमिति सर्वव्यापकत्वादाकाश[illegible]नियत[illegible]कारं कृतिः अत्र
44

रीरं वा वसन्तमिति तर्हि किमस्य मूर्त्तीदाने प्रयोजनमित्यत्राह सेवेति सज्जनानां हितस्य चिंतेकाग्रस्य हृ
नयेन तु मनो विषये सन्तत्वे स्मृतिर्भवेदिति विमलत्वां तु या श्रान्तो शहीता निखिलानन्दकरा मूर्त्तिर्येन तं
न तज्जीववद् दृष्टवशादित्यर्थः स्मृतिः सम्भवात्यात्ममायेति २२ एवं हृदयपुंडरीके वारं वारं स्मरणेन
हृष्याकारोपरामां हरिमूर्त्तिं जगदन्तर्यामितया वर्णमयं सत्यात्मार्पणेनाप्युपदिशति । स्थाम्बोष्विषम
नन भोसि जंगमानि ज्योतींषि दृसनगासिंधु दिक्सरांसि किं चान्यद् यदखिलकं हरेः शरीरं मत्वा तं प्रणमेदि
याई याव नन्मः २३ । धरादीनि पंचभूतानि जंगमानि पशुमनुष्यादीनि ज्योतींषि सूर्यचंद्रनक्षत्रादीनि द्रुमा
न्सस्यादिश्च तज्जातीः नगान् हिमालयादि पर्वतान् सिन्धून् समसमुद्रान् दिशः सर्वा दिक्ककुभः सरांसि नदनदी
कासारान् यत्किंचिदवशिष्टं भूतजातं तदखिलकं सर्वं विश्वमयस्य हरेः शरीरं मत्वाऽऽकृतिवाकज्ञस्यविम
र्शेन्नावष्टम्भ्याई यास्प्रेमरससनिर्भरया हरिचित्तनपरयाधिया प्रणमेत् सर्वान्तर्यामित्वबोधेन देहात्मत्वाप्या
त्मसमर्पयेदित्यर्थः कीदृशं तं प्रनमेत् हरिमूर्तीन रतिनिश्वयविषुक्तं श्रुतिः अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दि
शः श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मेति २३ । इदानीं
हरिमूर्त्तिध्यानस्य फलितमाह । चित्तासंभवति हरौ तथा तु हृष्याचेनस्से निजमलश्री शुद्धि हेतुः दयार
र्शनमयते श्रयास मूर्त्तीनस्याथैजरूपरूयाचनायथावेत २४ हे चेतः तथा तु हृष्या विश्वान्तर्बहिर्भग

शिव
टी
४५
45

वहूपात्मकध्यानानुवर्तनेनस्वीयस्यमलस्यविस्वैवैचित्र्यवासनात्मककालिकातिशयमार्जनस्यहेतुः कारणं
निष्ठासमाधानशर्विकानन्यस्मारहरोमोहावरणकर्तनप्रगल्भेनेशानमसोभेदनेदीपवन्निर्मोहतत्वसंभवति
जायते श्रुतिः पतेतरुणयैर्यततेनयत्नविद्वांस्तस्यैषआत्माविशतिब्रह्मधामेति ततः किमतआह दयादिति
अथनिष्ठानन्तरंश्रेयसाब्रह्मरुद्रादीनामपिदुर्लभतमयासमेमातिशयोकंदवेनात्मकारतामापादितयाशय
माकारशूलीतितभंयसभक्तानर्थापहारीभगवान्दर्शनेसाक्षात्कारत्वंदयादिशेत् श्रुतिः तस्यैषआत्माविवृणु
तेतनूंस्वामितितस्यसर्वोपास्यमूर्त्तेःसाक्षात्कारतामागतस्यापेक्षुरतः पुरुषाचनाः संसृतिविरामोपायानेकप्रा
र्थनास्तथाकुरुविधेयेर्थेलोट् यथाभवेत् निजभक्तममिमत्वाविद्यानन्तकार्योपलवात्मायात् स्वात्मैकतत्ववितर
णप्रीयाद्वा भगवता मच्चित्तः सर्वदुर्गाणिमत्प्रसादात्तरिष्यसीति २४ ननुमूलोपाधिकर्तनमसोपशुक्तिवि
तरोपाधिनिकृष्णा किंयथाशूलमन्त्रेणसूतस्यभेदेनस्कन्धशाखादीनांपातइर्यतइदानेषामत्रत्यनिहत्या
तस्याः शामनेविनासर्वोपाधीनांव्योतिस्तच्छान्त्यासर्वशान्तिरित्यत्राह । तंवात्मानवगमसर्पदंशमूर्च्छीभू
तंजमलपासिवेदयभामवादम् मंत्रसत्तातवशनकैः प्रहीयमाणयाज्ञानेप्रतिहतिमन्यथाभवेन्नो २५ । स्वात्म
नः स्वरूपभूतस्यचिदात्मनोनवगमः अज्ञानं सएवसर्पस्तस्यदंशेनमोहात्मकसविषस्फुरणेनमूर्च्छीभूतमचे
तनीभूतंत्वंवेद्येवे [illegible] विषयेनात्मनिदेहादौभात्मनः चित्प्रकाशात्मनः वादंक्रोशांतेलीनोहंगच्छामितिश्चमिप

यथामिव यथिरोहं स्वामिग्रहोऽहं जानामीत्यायात्मकं रम्यारमप्रत्ययप्रवाहमन्योन्यायाः संप्रलपसि सफलम
ज्ञानाकथितवत भाष्ये ग्रन्थोन्यात्मकतामन्योन्यधर्मोग्राह्यस्येति इदानींतवचद्वतस्तन्मोपवितस्यविमलप
र्मस्यफलपक्वावसरप्राप्यातरम्याशयं सूचयति मम्यइति साचिराग्निनात्तानशूर्व्वाहरिह्नर्तिमाभजनस्तवश
नकैः प्रहीयमाणाशाम्यन्तीभवतीति मन्येहं जानामि रामगीतायां एवं मदात्मानमखेडितात्मनो विभावयमा
नस्यविशुद्धभावना इत्यादविद्यामचिरेणकारकैरसायनंयद्दुपासितंरुजीति नन्वकथमेतत्त्वयाज्ञातम
नुमानेनेत्याह याञ्चेति हरिंनिजनवबोधामृतदानेनाविद्यात्मकशूर्व्वाहरनारंभगवन्तंप्रतिवद्यमाणपद्यैर्नि
गद्याप्रार्थनास्यात् नचप्रमाणमाह श्रमयेति साशूर्व्वावस्यायाचेन्नस्यान्नहिं हरिंप्रतिप्रार्थनापिनोभवेन्नसंज्ञा
नास्यात् ततोहरिंप्रतिप्रार्थनात्वयानुमानेनशूर्व्वायाः स्तीयवंसहचितंयतिरेकेण निर्मलफलस्यनहिइतिम
तिभावः त्वच्चिन्तामणौ मायामयमलान्यसदिव्यस्त्तानवत्त्वधः निर्मलीकरणेनाथनदृक्किंपरमांजन
मिति २५ एवंब्रात्नानरथ्यानेत्रप्रवणतया निर्मलनिषण्णएदज्ञानन्तरप्रथितंध्येयाकारंभगवन्तंप्रतियाः प्रार्थ
नाविधेयास्ताः शिक्षयतियावन्यकाशसमाप्ति । बलेमामृतजलधौवितापतमंसर्व्वकाननदववदथदन्ति
कल्पन श्रान्तत्वामरणवपुर्भक्तरूप्भूताविश्रामेयमितिहरिंनमर्थयान्तः २९ । हेगुरूकल्पनामोच्चारणमात्रे
णानानापापोपशमलालितस्यात्मस्फूर्तिप्रद भागवते सर्व्वेषामप्यवतामिदमेवरमतिक्षुतम नामस्या

वि॰ प्र
टी
४९
48

हरणं विलोर्थं तत्तद्विषयासक्तिरिति मत्वैवाविद्यया जन्ममरणाभीत्रयं व्रतन्नीकृतमहं ततः पश्चात्तापततममा
द्दिभौतिकाधिदैविकाध्यात्मिकतापत्रयेणादन्दह्यमानं कस्य सदृशमित्याह कानने तिष्ठ नेत्र काग्निनाश्र
ष्टेणाकरिणा सदृशं मत्तं नवभक्तकमलस्य फलाभिसंधि विशिष्टं निरवधिप्रमत्तं देव वृत्त मत्वा द्रुमास्थमे
हृतत्वा स्वामृतं तस्य जलयौघास्तस्य तापत्रयशमकोत्तापरया विमर्शधिया वत्स तामरणावद्गुः कालातीत
तत्वंभूत्वा विश्रमेयं परस्तवैवमन्तु भवेयं प्राकोत्तापोल्लिङ यथा दावाग्निदग्धो विद्दन्तीवेगोपायेन तत्स्वान्निर्ग चित्र॰
तः जलेतिमज्जय विश्राम्यतीत्यर्थः भागवते अयं तत्कथामृष्टपीयूषवनद्यां मनोवारणः क्लेशदावाग्निदग्धः
तृषार्तोवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसम्पन्नवन्न इति हे चित्त रतिप्रनेन सकोमत्तं विमापश्यहर्तारं
ग्रन्तः स्वमोस्थितं अर्थं यथावत्स्वसर्वांशणसमर्पणेन वरं वरयेत्यर्थः २९। यथा स्वात्ममाधिगत्योक्तत्वा विषयेता
वत्कालमीहादृशापरामं तद्वसातिं स्वर्वसोकान्तर्गतमञ्जुकल्पदस्यार्थाविष्कर्षेण प्रार्थयेति तापयति।
स्वाविद्याशायनगतं प्रसुप्तं तत्वं कामाद्याहितपतिभिस्तताविहृत्य शोष्याप्यावगति गिरा कन्दरान्तरात्त्वं दस्से
मेत्वितिहरीमर्थयाम्यगं वम् २१। हे सुकल्यस्य स्वनिजचिदानन्दैकरसस्वभावस्याविद्यासर्वानर्थव्रातमूल
महान्तं मेवशायन्तं तत्स्वं तन्नगतं प्रसुप्तमित्यर्थः ततः किमतआह प्रसुप्तेति कामः रूपादिविषयेषु हिताहित
तर्कस्यानिरवसानप्रवृत्तिः स एव सर्वोन्मादस्थलत्वादाघः अग्निमायेषां क्रोधादीनां तैरेवाहितपतिभिः चोर

राजेः प्रवृत्तं निजनिजक्रियां तत्त्वनिर्मितां विस्मारितं तत्त्वं नित्यानंदादिगुणनिर्भरं देहाद्यारोपवर्जितं स्वस्व
स्वरूपं यस्मात् [illegible] हे वासिष्ठ कामक्रोधस्तथा लोभो देहे तिष्ठन्ति तस्कराः तेषु सत्सु निजगत्स्वान्तःस्वं [illegible] आज्ञा
यतस्ज्ञायते इति किंचन वा तु अहं देवधर्यादयाहं किं कर्तव्यं शक्तं तत् त्वमेव महत्कृपया निःशेषाम् आयत्तो वि
त निजतामार्थं प्रथयेति प्रार्थयन्तेतानिति प्राप्तेत्यादि दुःखप्रवाहकर्तृन् कामादीन् निरस्य तन्मतियोगि
सन्तोषादिप्रदानेन विहिंसायान्ता नतत्स्वगतेमां प्रवगतिर्वक्तं न तावदृत्ति र्यया भवति यया गिरा महावाक
वारणप्रोत्थाप्य कदाचित् [illegible] नस्तत्र नसख्यामितयोः [illegible] चरणशरणापन्नस्य मे आत्मरत्नं शुद्धबोधला
भेन सर्वोपलापावशिष्टमात्मचैतन्यमेव स्वभासान्यप्रकाशकरत्वादद्वितीयत्वं च इति प्रसेकस्मिन् [illegible] कृतपरिपा
कावसरे दत्तमिमद्य [illegible] भवे प्रापयेत्यर्थः इति हिरण्यां तात्पर्येण अविद्या तत्कार्यहारिणीं प्रार्थयया [illegible] स्तोत्र
कस्तं अन्तरस्य तिन रामताणीयसी यावत् दप्रथन कालिकास्तिमे तामपीशपरिमिज्य सर्वतः स्वस्वरूपम
मलं प्रकाशयेति ननु कुतोऽहं लभामि तमित्यत्राह आत्मगमिति आत्मनिग्रहं कारोपलतीति जीवात्म
निसातिचैतन्यात्मना यातं यप्रदेवकार्यकारणसंघातात्मकशरीरान्तरे न दर्शोपरिशान विग्रहो यानते ना
विर्भूतमित्यर्थः श्रुतिः अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषा इति २२ ननु करण
मन्तरेण क्रिया न भवतीति तत्साधनं [illegible] फलसाधनदानाय प्रसीदेति प्रार्थनां कारयति । त्वदमावग

विम
टी
४०

मवलाक्रमत्वयत्नदोर्दण्डैर्हतनिखिलास्पृहाष्टषड्भिः ॥ कामाद्याहितनृपतिं कदा पुरारे हत्वास्मीति विहर
रिमर्थयात्मगं तव ॥ २८ ॥ हे पुरारे अन्तानात्मकर्मादेरपघातकत्वया परमकृपालुना दत्तैः समर्पितैर्वाग
मो महावाक्यार्थपरामर्शजं ज्ञानं तदेव बलं तेनाक्रान्ता गृहीता ये मत्प्रयत्नाः शमदमादिरूपास्त एव दोर्दण्डाः
कामादिशत्रुदलनपटवो भुजदण्डास्तैः भगवता तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ददामि बुद्धियो
गं तं येन मामुपयान्ति ते इति कीदृशैस्तैरित्याह हतेति हतं पुण्यपापविपाकाक्षरोदयो यैः तैः सदसद्विम
र्शेन संस्पृताः निखिलानामैहिकामुष्मिकपदार्थवृन्दानाम स्पृहाः सर्वस्पृहच्छेदनात्तैः अष्टावि
रतयः ताभ्य एव षड्भिर्वाणैस्तैः कामादीनामेवाहितानां परमस्वबलाभरूप हितप्रतिकूलानां नृपतिं निजब
लेनानुचराणां स्वस्वविषयेषु दत्ताधिपत्यं मोहं कदा वद तानुग्रहकाले हत्वास्मि मारयामि न हि नानाज
न्मविमलकर्मानुष्ठानावाप्तभगवदनुग्रहलब्धपरबोधव्यतिरेकेण वस्तुतस्त्वयात्मकमोहसमुन्मूलने श
क्तिर्जीवस्य विश्वकेन व्यावहारिकसमस्तप्रत्ययकर्मणो मिथ्यासर्पस्येव मोहकर्मणो रेकाश्रयत्वेन विरुद्धरू
पाभावात्तस्मादीश्वरानुग्रहायत्तेन मोहकर्तनेन तद्धेतात्मकस्यैव मम ग्रहणादवशिष्टं भयं यथाभूत वस्तु
न इति भावः शैवनये जयन्ति मोहमायादिमलसंक्षालनक्षमाः शैवयोगबलाकृष्टा दिव्यपीयूषविपु
षः इति आत्मगं निजान्तर्गतं हरिं चिन्तनमात्रेणैव वासनाकालुष्यहरं तारं प्रार्थये याचस्व भागवते तत्कर्म



निर्हारमभीप्सतो हरेः गुणानुवादः खलु सत्वभावन इति २८। ननु त्रिकालमात्मैकनाथानुसन्धाने प्रवण
त्वाद्देहादेः कथं तत्त्वादिकृतिभ्यो निपातानां नानारकाबाभावस्तत्कटङ्कः स्वानुभवस्तथापि नानर्थनिवृत्तिरात्म
नोऽनुसन्धानस्य किं फलमित्याशंकायाः परिहाराय लोकोऽनरयत्तन्निर्मितो मह्यं लिप्सार्थयेति शिक्षयति द्वा
भ्यां। रागादीन् मधुरविषीन् कामक्रोधौ मेषौ दोद्द्विरिणगणाः शरीरखाद्याः प्रत्तानं चरमपशून्मदादयो मे
नाप्याद्याः पशुवधका विवेकसुरवोः २९ पतेन्यार्थाहिपरिचिताः स्वहात्मयागं कर्तुं मे त्वन्तभवबोधकल्पवका
विदकौ सकलमिदं जुहोमि सारवायुत्रनैति तिरिहरिमर्थयात्मयोगं नमः ३०। रम्यायासेवद्यास्वहाम्मिका चित
वृत्तिभेदः रागश्रादिशाश्वन्द्वेषः परोत्कर्षासहेहृत्तिविशेषस्तौ मधुरविषीदौ द्वाइति द्वयं प्रत्युज्ज्वलविषयो
स्थित रागात्मको भिलाषः कामः प्रतिकूलविषयदर्शनश्रवणादिजज्वलितवृत्तिः क्रोधः भागवते ह्युक्तं
प्रेमन्तु दोषवादिनो किलीतिल्मा: किलीस्तनकर्णाश्मलउल्लूकवाभिर्वर्षितान्तरात्मति तौ मेषौ मेषद्वयं शरीरखाद्याः देहेन्द्रियान्तःकरणावि
प्रत्यन्तदोषवादिनो उल्लूकान्तल्पाः द्विरिणगणाः धनादिसस्पृहाः चित्तत्वस्फुरणावष्टम्भसुलाविघात्प्रत्तानं चरमपशुः विशिष्टक्रियान्तरानव
शेषत्वात्यत्तान्निमाइतिवलिः अन्ये मदादयः दर्पपशुरप्यन्ये तानतममपरतत्तापोहकाहर्षामदश्रादिर्येषां मा
नमात्सर्यादीनां ते आप्यार्थाः चूतयवादयः जडान्तरादियमेदेहादिभ्यः सच्चिदानन्दात्मकतयात्मनः स्थय हृ
तिर्विवेकः स एव स्रुवः प्रधानं येषां वस्तुविचारादीनां ते कामक्रोधादिपशुहिंसकाः पतेऽर्याश्चात्मयज

वि प
टी
८८
48

नायपदार्थो मया परिचिन्तापोहवशात्त्वेन संभृताः हे श्रुतकीर्ति भक्तवाञ्छापरायणाय स्वीकृतविग्रहोपयो
गव्यापारकर्मणा पिरागद्वेषात्यन्ताभावादशेषत्वस्वरूपमेव जीवब्रह्मैकत्वलिप्सोरात्मयागं विश्रुदतन्नवि
देकतात्मकं यज्ञेकर्तेस्वहायत्तिं तत्त्वंपदार्थविवेकजन्ययथार्थकृत्तवेदनेवाथः सर्वविश्ववपिश्रुतोऽयं
विधिरात्मस्वकृताब्रह्मोपदेशाभक्तसम्यगस्य स्मृतिः त्वमसि ह्यस्य शृणु हर्गरीयानि तिसकलं धरास्वव्याकृता
काशपर्यन्तेश्वरं दं करणचक्रप्रमेयं नानाविधयज्ञातं जुहोमि तदाहुतिं ददामि अत्रैदं प्रमातितयाहविरुक्ता
वितिहृतेन्धनदहनपटुत्विचिद्देशे सर्वासां श्रुतीनां विमलार्थतत्त्वदर्शनहेतवः सारवाचः महावाक्यानित्ता
एवमन्त्राणि श्रेष्टदेवाह्वानकारीणि रहस्यवाक्यानितैः व्यापान्तरार्थानामखण्डैकरूपस्यैव विश्वाभासोपशमे
अयन्न॰ यथास्थिततत्त्वस्वयमेव निश्चयेनेद्रूदयं ततो नं हि भिन्नं यत्र धर्माधर्मशंकाप्रवर्तते सा प्यपास्ता कर्तृकर्मणोरभा किंचि+
वादतोऽशेषविकारजातस्य चिन्मयत्वे सिद्धमाकारमात्रस्य विशुद्धदायं तकोऽसोरसनादिति निश्चयमात्रं सर्वान
र्थोन्मूलनकरं किं शतनिष्ठतिभावः श्रुतिः कः शोकः को मोहः एकत्वमनुपश्यतः इति तत्केन कं पश्येदिति स्मृ
तिः ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिनेति वासिष्ठे अन्तर्मुखत
या सर्वं चिद्वह्नौ त्रिजगत्तृणम् जुहतोऽन्तर्निवर्तन्ते राम चित्तादिविभ्रमाः इति आत्मगं निखिलशरीरान्तर्गते
हविमातीर्विहारिणामर्चय २९ यः। यस्य महत्त्वकीर्तने सर्वाधारशेषभट्टारकस्यापि सहस्रजिह्वोऽयः श्रुतिवचां

सिचमूकीभवेद्युः सोऽचिंत्यमाहात्म्योऽब्रह्मलोकाद्युदितविंभ्रमाणाञ्च यो देहाद्यहंप्रत्ययवलितत्ह्देशेर्मतदामर्शीनवामवा
चः किंशुनाद्यादिति हृदयग्रंथिविमोचयंहरिभक्तियोगमुपसंहरति। एवं श्रोष्यति भगवांस्तवापियाज्ञाः प्रीयेतापि
चसवदेनयेति चित्त भूयोऽमेस्मृतिविगमोऽस्मामाकदाचित्प्रोक्तैवंभवतिचिदात्मनातत्वान्तः ३१। एवंस्वोक्तप्रकारेण वर्णि
तायाचनाः संसारदुःखोक्रान्तस्यतवापि भगवान् मनोवागगोचरत्वानादिषड्ऐश्वर्यसम्पन्नः श्रोष्यति निजान्तर्यामितयाश्रो
तं स्यादसति भगवता सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठतीति श्रुतिः सर्वतः श्रुतिमत्कर्णादिति किंचदुःखितत्वादनुकम्प्य
नुकम्पाविधानत्वमेवमहतो महत्वं तत्सर्वतो विशेषत्वेन भगवन्निस्थितं सर्वत्वकस्यानुग्रहनिर्माणत्वर्वस्वसात्मसम
र्पणाद्येत्याशयं विवृणोति प्रीयेतेत्यादिनाऽपि च भगवान्प्रीतिं कुर्वीत यथार्भकाणां काकलीषु पिता प्रीयेत तथेत्यर्थः भ
गवता भक्तिमान्यः स मे प्रिय इति ननु कथं प्रीतिस्तस्य ममानुभवविषयास्यादित्याह स इति भक्तानुग्रहकर्ता भगवान्
हे चित्त यथार्थं नास्त्यस्याहं तास्तथा सन्त्विति तिवदेत वरदानेन ब्रूयात् तस्याऽयाचितवरप्रदानादपि महन्महत्वं दर्शयति भूय इति
विश्वाकारस्य ममपुनः स्मृतिभ्रंशः कदाऽपि क्वचिदवसरे तव मास्तु नित्यं मदनुसंधानतन्निंगमनाशनादिव्यापारेषु अहा विश्ववद्
वेत्स्व त्वमवरदानरूपो भावार्थः वार्तिके निर्विशेषं परं ब्रह्मसाक्षात्कर्तुमनीश्वराः ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणै रि
ति ननु यथास्सकामानां तपोयोगादिभिराविर्भूतो हरिर्निजकामनया वरं दद्यात्तर्हि न तथा ममापिकथं मत्स्मृतिविगमाभाव
रूपं वरं से स्यतीत्याशंक्याह शोक्तेति एवं वरदानादिप्रकारं वास्तव्यातिरेकेणाभिधाय तवान्तः नविमल रूढगगने चिदेकरसघना
त्मना समयते न तु कामभक्तानामिव सोऽन्तर्यानं वियन्नहंकाररसादिना तिमप्रकटएवेतिभावः भगवता तस्याहं न प्रणश्यामि
स च मे न प्रणश्यतीति। कार्श्यं तमोऽन्तरेयात विश्वकीर्तिं भामनात् पांडुरं निर्मितं येन तं हरिं नं ने स्मः इति श्रीचित्तप्रदीपकुसुमे
चित्तशुद्धिहेतुहरिभक्तियोगो नाम द्वितीयः प्रकाशः २।

वि
प्र टी
५९

ॐ श्रीगणेशाय नमः । यच्छक्तिकलनमनतिविश्वविचित्रभावभासात्मनामलधियो हृदि चर्वणीया नो चेत्कथं स्फुरणमस्य सदा
त्मकं स्यान्नं शक्तियुक्तवपुषं शिवमानतोऽस्मि । शक्तिरिदं शक्तिमतः स्वतन्त्रस्येति वेदनम् तृतीयस्य प्रकाशैवेषास्ति चित्तेः शिवाचे
नम् इत्येष परप्रमात्रा प्रशान्तानामांशस्य चित्तस्यानिर्वाच्यतत्त्वसमावेशाय स्वभिन्नो स्वेच्छयोहं किते चिदानन्दाख्यशक्ति
हृदयेस्मरणि हृदयवस्तु प्रकाशिते तत्र विश्वव्याप्तिवीजाया विस्ताराख्यचिच्छक्तेरान्तरी एजा स्फारिता इदानीं द्वितीयायाः परा
स्ततोल्लासाख्यायाः शिवाख्यानन्दशक्तेरर्चीरम्यते तत्र प्रथममस्त्युपगमनशंकाव्याहृत्तये तयोरूपास्ययोः सामाना
धिकरण्येन तात्त्विकं वस्तु निगमयति । चिच्छक्त्यावलिततवपुर्यदस्ति तत्त्वं तेनानन्तशविमलसत्त्वमूर्तिघुमम् एकस्याप्र
चितिरानन्दितबोधकानामेवमूल(स्फुरत्)धान्तयेपरायाः ॥ १ ॥ हे चित्त निःशेषविश्वचैतन्यप्रथाभित्तिः चिदेव शक्तिः कार्योपयोगाकार
णानिष्टसामर्थ्यं तया वलितमपरोऽद्भुतरसवदेकरसत्वेनास्मि इदं वपुः वस्तुस्वभावं यस्य यत्तत्त्वं निर्विशेषं विश्वारोपवर्जितं ।
परार्थं वस्तु प्रसिद्ध्याक्रान्तकालत्रये णावर्तते वासिष्ठे शिवस्यानन्तरूपस्यैषा चिन्मात्रतात्मनः एषा हि शक्तिरिच्छा
नास्माद्भिन्नामनागपीति नैजमेतत्तत्त्वमवोधं तु भूत्वानामाकृतिवैपुर्यान्तनस्तदामर्शोपयोगात्मनानिष्ययमिताश
यमुत्थाप्य परप्रमात्रा तथा संहृत्तमिति सूचयति तेनेति निःसामान्यवपुषा प्रविमलं मायीयकालिमारिक्तं यत्तत्त्वं स्फुट
विद्याशक्तिकवचं तदेव मूर्तिराकृतिर्यस्य पुंसस्तदानन्तस्वातन्त्र्यशक्त्यात्मीकृते वासिष्ठे सत्त्वे हरिहरादय इति ननु क
त्तयोर्विभाग इत्यत्राह एकस्या इति विश्वव्यापकचिदात्मिकाया शुन्तेरपचितिः विश्वाभिन्नचित्परामर्शव्यग्रत्वमची ग्रोत
रीयं तच्छिन्नभूमौ वहिर्विसृतवैचित्र्यविश्रान्तये नान्तर्व्यवधिनरममाणा तत्र एजा क्रमशः स्फुरत्योल्लासत्वेन वर्णिता अपराया
द्वितीयाया विश्वव्यापानन्ददत्तत्वाया मूर्तेस्ता मान्तरी एजा पर्यवीक्रवचनाक्रमेण स्फुरणोन्मेषान्तसमाधानेभव ननु कोलाभस्तस्याः

अवलोकनमात्र मलेति मायीयकालुष्यप्रक्षालनाय अस्य समाहितोऽन्तर अवलोकनमायीयमलशान्तेलीभइतिभावः शैव
नये निश्चयः पुनरेवोत्तवदर्थिक्षणमेवच प्रसादेमनसः स्वामिन्याः सिद्धिस्तत्परंपदमिति १ ॥ ननुचिहृंखले चित्तंतना
श्लिष्टस्य चेतस्य समाहत्वमलभ्योऽङ्गंसनमंतदेककथमियंप्रतिफलतीत्यतस्तन्मार्जनशक्त्युपायंप्रथममाचष्टे । गेहे
वीतस्थानपदार्थकायान्यात्रायामिवमिलितान्दिकालजत्यागान् विज्ञायव्यसनभयादिक्रकर्षक्रोधात्मानं विरमतः
सोभनस्वशंशुम २ । गेहेगेहेभूमिः तत्रः शरीरंधनेदारणमभयंदाराश्रकआदिस्तेषांमितान्तानाममताग्राह्याणामर्थो
नीतात्मयात्रायामिवतीर्थासावागतजनग्रामात्मार्गेमिलितानसोन्व्याहत्यासंगतान् पुनरपिविमुक्तानन्तोन्याशयग्र
स्थनाभावादित्यर्थः अतएवकालजत्यागान् सूर्यास्तोदयप्रवाहनिर्वाहात्मनाकालेनचर्वितान् वासिष्टे स्वमेंद्रजालवत्प
श्यदिनानिरात्रीणिर्पंचवा मित्रदेशधनागारदारापुत्रादिसंपदइति तथोक्तं कृपागृहीतःसमवेशवन्धनत्वप्रपन्नान्नाश्रमे
नकस्येति व्यसनमिष्टानिष्टसंविलयवाद्यः भयंतत्वाख्यातिजन्यसंकोचदर्शनबुद्धिहितीयस्फुरितानिचितोद्वेजनं नेत्यादीं
श्चामनेषांत्रुत्स्यानेहेतुलोवेधकदेनानांचक्रमिवचक्रमायुधविशेषस्तेनहृत्कोत्रोदितमात्मानंस्त्रीयंरूपंविज्ञायविमर्शी
दत्तश्च ततः संकल्पोमोनष्टहेत्वमवगैमः विरमतावर्तस्य विज्ञानभैरवे कालाग्निनाकालपदादुत्थितेनस्वकेशरम्
स्वदेहविचिंतयेद्दैतेशान्ताभासःप्रजायते एवमेवजगत्सर्वंदग्धंध्यात्वाविकल्पतःइति ननुसंपदस्फुरितव्यतिरेकेणममनति
ष्टाकिंतिर्मेयमतत्वग्राहः भजस्वेति तित्तनस्तत्त्वसत्ताथामशेषंदेहादिमितमात्रत्वशमनेनसमाविशस्व तत्वसारे अ
द्वैतंभावयेत्त्रित्यंद्वैतभावंविवर्जयेत् कालस्तत्तभयंविश्वेकालातीतेभयंकुतःइति २॥ ननुयस्यविमर्शेहरामकिशा
लिनामद्ययानंदचमत्कृतिर्भवति तस्यभगवतःकीदृशीसास्थूलाकृतिर्मितवृत्यत्रमनसःस्वत्वाकृतौधारणानापत्तेःसोपा

वि
प्र टी
५
50

नाहं समन्तरेण गौरीप्रसादान्न परिणामवदिति तोऽक्षिपति । गौर्यर्धाङ्गिकितं तत्र गलितः फणीन्द्रघनहाराः शिरसि विधुः स्फुरत्कपर्दे
गङ्गा यस्त्रिनयनपञ्चवक्त्रः सितांशुगौरहासः करिपतिचर्म तं भजस्व ३। गौर्याः स्वहृद्विद्यादिदेवताया अर्धेन समं शोभितोऽङ्किताङ्गि
ह्निता तत्र विग्रहे हृदयशोभा प्रस्ति अनेन परसंविद्भिन्नत्वमुक्तं यस्मात् सितिम्नस्वर्णाभ्यस्यत्वात्तन्तु वेदादिदैवतस्याभूषाः कटकं
डलाद्यलङ्काराः फणीन्द्राः शेषवासुकादयः अनेन भयस्य मलाद्दूयत्वमुक्तं द्वितीयाद्वै भयं भवतीति श्रुतेः यस्य शिरः
सि विधुश्चन्द्रः तथा रणक्रमनिर्भिन्नब्रह्माण्डोऽङ्कृतपरबोधमयचन्द्रमा अनेन नासामामन्यत्वमस्य सूचितं यत्कपर्दे लोकोत्तरस्वभा
वस्य जटाजूटे मातेव गङ्गा त्रैलोक्यपावनी स्वर्नदी अनेन विश्वाधारत्वमेकान्तेन कीर्तितं यस्त्रिनयनः पूतसोमसूर्याग्निनेत्र
यधारी अनेन मानमेयमातृणामेकाधारत्वमुक्तं यः सितांशुः मायाकाश्यपतालनात्मांशुतस्य स्वहृद्विद्याविग्रहः लोकालो
कव्यापित्वगीतगीतत्वेऽपि विकारवैधुर्यमीरितं यस्य निरावरणस्य वस्त्रं करिपतिचर्म गजेन्द्रकृत्तिः अनेन वैयाहंप्रत्ययवैवश्य
राहित्यं सूचितं तेनिःशेषतां नस्वलक्षणोपलक्ष्यं शंभुं सदाशिवस्वरूपिणं समाहूतं भजस्व चित्तभूमावारोपय अनिर्वाच्यतत्त्वं
समाविविक्षूणां विमलभक्तिभाजां तत्स्वैव प्रसर्पणमीदृगाकारं महामाहेश्वराणां तत्त्वं स्वप्रमातरि समस्तं तत्त्वतया प
रामृश्यमिति भावः श्रुतिः उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तं ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसा
क्षिणं तमसः परस्तादिति ३॥ न हि समस्तभीमीर्णस्वरूपमेतावदेव भगवतः किं त्वशेषाणां निजनिजफलनिष्पत्तिरस्मादेवेत्या
ह । ब्रह्माद्याः विबुधगणाः सनन्दनाद्याः योगीन्द्राः ऋषिप्रवराश्च नारदाद्याः यस्मात् नतरस्वबललब्धप्रतीतेन श्येतश्रियं भ्रम
ले वितर्कस्त्विम ४ । ब्रह्माद्याः अग्र्योत्कर्षविभूतयः सर्गादिनिर्माणशक्तिमन्तोऽपि विबुधगणाः विरिञ्चिप्रभृतयः योगीन्द्राः स्व
स्वनाड्यन्तरप्राणापाननिर्यन्त्रणमात्रवलविलावरणनिर्गतानां योगिनां मिन्द्राः स्वनिष्ठितस्वरूपलब्धप्रतीत्या प्रकचद्रूपाः

सनंदनाद्याश्चत्वारो ब्रह्मपुत्राः अभिश्रुततत्त्वमस्यादिमहावाक्यविमर्शजन्यविवेकोपबृंहितस्ववराः समावेशैकाग्रतया वरणी
यानन्तरदाराः यस्मादयानंदमहार्णवस्याग्रे समग्रभूमिकाजयेन परिलब्धसन्निकाशाः अनन्तरस्य खेलयेत्येव यीतीताद्भुतात्.
समावेशाय प्रतीक्षन्ते आभिमुख्येन तत्त्वावेशोपायमभिमन्य पद्यन्ते इति स्तवचिंतामणौ ब्रह्माद्योऽपि तत्र यस्य कर्मसोपान:
लीलया उपर्युपरि धावन्ति लघ्वं धामनन्तमामितमिति तेन निखिललोकेशकीर्तितमहत्त्वं शिवं तद्यानंदघनं वितर्कयदे
हादिमात्रत्वाभिमानापस्पष्टीकृत्याश्रयाय ननु सकोचासि त्विमर्शोद्गम्यते तत्र माह स्वमिति स्वात्मीये चिदानंदस्वरूपे स्वा:
भिन्नवेदनमेव संघातेतदामर्शव्याप्तत्वमिति भावः विज्ञानभैरवे नित्यो विभुर्निराधारो व्यापकश्चाखिलाधिपः शब्दा·
न्प्रति लक्षणं प्रायन्कृतार्थोर्थानुरूपतः इति ननु प्रमेयवर्गात् हितत्वात् द्विकृत्यात् तस्यापि विकारस्तत्राह अमलमिति
अविद्यमानमूलत्वमलादि प्रचयोपस्थितविविधवेद्यदृष्ट्या स्थितस्यापि अस्य चिदानंदतत्त्वस्य ह्यानंदतोऽनमस्कोतगतरत्न
वत्काचिल्लातिरिति भावः स्तवचिंतामणौ भिन्नेष्वपि न भिन्नेयच्छिन्नेष्वच्छिन्नमेव च इति ४ ॥ ननु स्वात्मत्वे किं तस्य प्रमाण
मित्याह अर्केंदुद्रुत उदयेक्रमाद्व्याप्यप्रसन्नो तरगतमातृमेयवर्गम् आभास्यात्मितश्च मे स्वपोषदंतस्तज्ज्योतिः किम
पिशिवाख्यमाश्रयांतः ५ । यतः प्रकाशानंदसामरस्यवपुषः इमे सर्वाप्रभवगोचरे अर्केंदुदहनाख्यायकं प्राणापानो
क्रमादेकैकात्मोदयपरिपाकत उदयमभिव्यक्तिमवाप्य प्रकाशानंदस्फुरणेन लब्धसत्ताकोऽभूत्वा प्रसन्नो उदयप्रशमविला
सैतशस्वा यं च्चतरश्यापारस्पदे हसंतोतरमध्येगते मातृमेयवर्गं वा स्वामंतरकरणतन्मात्रचक्रं आभासमसात्कृत्वा मयं
संपाद्य स्वयं स्वेनैव नन्तपरतोदनेन यस्मान्नत्तोदयप्रकाशानंदसागरस्य तरंगवदंतर्मध्ये अस्तं तरेकप्रमितः आभ्यंतरत्तज्ञ
त्वाद्यो यस्मात्त्वयि स्थितत्वैव सत्त्वीयते सजातीयत्वादिति भावः साम्बस्तवे अग्नीषोमावविलजगतः कारणं तौ मयूखैः

वि
प्र टी
५१
51

सर्गादनेस्त्वजसिभगवन् ह्रासवृद्धिक्रमेणेति तत्किमपिवाङ्मनसोरविषयत्वादनुत्तरं शिवाख्यंत्वदीयानंदनिर्दृशये
शिवमद्वैतंचतत्त्वमन्यंतइतिश्रुतेः ज्योतिःगभीकृताशेषप्रकाशं ज्योतिषामपितज्ज्योतिरितिस्मृतेः अंतःमध्यपश्चि
माश्रयवीथीमर्शेनमसंपदालेभेनेनदत्तइतरदेहाद्यहंप्रत्ययद्वारियनिमज्जनादुन्मज्य बाह्यार्थत्त्वस्फुटएवसोपिवि
वेच्यइति १ ॥ ननुसर्वप्रमातृणामेतद्गोचरमात्मेतिचेत्सर्वेस्वात्मविदःकिंनस्युरित्याशंक्य सततत्वाख्योतिप्रथित
वैचित्र्यप्रतिष्ठंभंजनव्यतिरेकेणनप्रतिभातीत्याह । यद्दिश्वावयवगतेनवेत्तिकश्चिद्यन्निष्कामतिमथनेनरुक्मिभाः
जाम दैतेयोदहनकृतेनिलाकणीनांतज्ज्योतिःकिमपिशिवाख्यमाश्रयामः ८ । यन्निःसामान्यस्वभावंविश्वस्याशेः
षप्रमातृचक्रस्यविश्वेषुसर्वेषुरोमकूपोतेषुवयवेषुगतंचैतन्यसत्तयानुस्यूतंकश्चिद्देयाद्यात्मबुद्धिःप्रमातानवेत्तिस्वात्म
तयानजानाति अहोतद्विलसितंमोहस्येतिभावः वासिष्ठे अहोनुचित्रामाययैतातविश्वविमोहिनी सर्वांगशोतमप्ये
नेयमात्मानंनपश्यतीति ननुनकस्यापिवेद्यंचेत्तर्हि शून्यत्वप्रसक्तिरित्याशंक्याजिहीर्षुस्तत्स्योगिनामनुभवत्वात्
सद्भावंदर्शयति यदिति युक्तिभाजांप्रकाशितहृदयमथनोपायचक्रनाणामिवप्राणापानयोगोपायेनघर्षतोदैतेयोदहनकृ
ते तत्त्वाभानुभासितस्यनानाभेदसंदर्भगर्भितस्यंपैतादिशिवांतविचित्रविश्वस्यवेधुक्तिसूक्ष्मवीजत्वेनसंकल्पस्यकाष्ठ ।
स्यचिदग्निमयक्रमार्थं अनिलाकणीनांप्राणापानाद्यरणिकाष्ठानांमथनेन कुर्धीपःशक्तिहृदयनिकेवात्मघर्षणेन
यदसामान्यंज्योतिःनिष्कामतिनिःशेषचेत्यकवलनोन्मुखमहस्फुरद्रूपतयानिर्यातीति वासिष्ठे काष्ठकुल्कचयोःश्लेषाद
याच्छेदःप्रवर्तते तयोःसंघर्षणाद्दग्निःस्वभावाज्जायतेतथेति सामप्रत्वेव यस्यप्राणारणिर्नियतेमथ्यमानामनसाद्धि
हृदयेज्योतिरिति तत्किमपिलोकोत्तरंशिवाख्यंसर्वाह्लाददंज्योतिःवेद्यप्रकाशात्मोदयापारस्वप्रकाशस्वभावं अतस्त्रि
यं
२

द्रुविघ्नाश्रयपूर्वोक्तसंस्कारशोषणायमेसेवय तदादानाद्दर्शितान्नितिमार्थः सूत्रे तदधिगमउत्तरपूर्वाघयोरश्लेषविना
शाविति ८ ननुस्वात्मपरमार्थप्रमातुःसम्यक्तीर्णस्वभावं कण्ठेभूतेयत्तत्त्वानांगणनैवनास्ति अपिचकस्मादिदमुच्यत्रमित्य
तित्याह । परमेच्छाचितिक्रतिविनिशक्तिपंचकोऽभःशृनिततत्तत्त्ववीचिवार्यः घस्यैदोऽहमितिशुरोदितोऽखिला
त्मायस्मान्नकिमपिमहेशात्तात्मले १ । परमेनिःशेषानंदपरायणपरमानंदःस्वातंत्र्यशक्तिःसेषइदम्मत्ववेद्यप्र
सरणस्फुरणमिच्छाशक्तिः सर्वजीवचैतन्यप्रथनभित्तिःचिच्छक्तिः स्वप्रथारूपसंवेदनात्माकृतिःक्रियाशक्तिःवेद्य
स्ययथास्थितवस्तुवेदनेविनिर्ज्ञानशक्तिस्तदात्मकशक्तिपंचकजलेनशृरितानिर्भरितात्ततनवअव्यक्ताः षड्विंशत
त्वान्येववीचयस्तरंगायस्यकार्येत्तस्मादनन्तप्रकाशानंदविग्रहात्महासमुद्रादखिलात्मागभीभूताशेषतत्त्वविग्रहो
योऽहमितिस्पंदःनिर्विकल्पोत्तानक्रियासंघट्टात्माप्रथमहृत्तिस्फारः तदुक्तं प्रोतत्राद्गुणरूपस्यघःस्फुरत्यति
भोदयः सर्वात्मबलशक्तीशश्चिद्रूपःस्पंदसंज्ञितइति प्रत्यभिज्ञायां याचैषाप्रतिभातत्तत्पदार्थक्रमरूषिता
अक्रमानेनचिद्रूपःप्रमातासमहेश्वरः व्यापकत्वात्सामान्यःसर्वसाधारणादपीति तत्किमपिमहः निरूनतमो
शेषप्रकाशगर्भितानंतप्रकाशः आणवादिमलत्रयाक्रांतस्यतवतमःशिवाद्वयाख्यातिरूपमेयकारमसतात्
परासूयमथनप्रतिभद्वाधेनपतिहरतात् लोकाक्षिषि तदुक्तं यस्याःप्रदेतनपर्यंतविषयःकैर्मिनोरंथैः मायात्मक
तिमिरगणसुस्लोपातनःशिवइति २॥ ननुकथमविदिततत्त्वानांतत्त्वताप्रतीतिःसंभवति विवेचकाभ्यकेनहा

वि
प टी
५२

रेण तत्त्वप्रविभागेतीत्युभयसिद्धये षट्त्रिंशत्तत्त्वप्रसवत्वेन परतत्त्वस्वभावं प्रकटयति । यस्मात्स्वात्मनः शिवशक्तिविंदु
नादरूपं विश्वात्मकपरतत्त्वभासनं स्यात् यस्मात्प्रथननिर्वेधनात्मिमायाक्रीडा तत्किमपि महोस्य तानमस्ते ८ ।
हेमानं सर्वस्मादनेन शक्तिप्रसरहेतुभूतपंचशक्तिसामरस्यस्वभावान्निर्विशेषप्रकाशात्परशिवाभिधा‹ना›द्रूहेस्वेदात
शिवस्य शक्तिस्य विंदुस्य नादस्य सेविति स्थात्मकानि स्वरूपाणि येषां परतत्त्वानां पंचतत्त्वानां तेषां भासनेसत्तास्फुरत्ता
त्मकं च नेस्यात् परमार्थसारे शिवशक्तिसदाशिवतामीश्वरविद्यामयीं च तत्त्वदशां शक्तीनां पंचानां विभक्तभावेन भा-
सयतीति सर्वप्रमातृंतः पूर्णाहंताचमत्कारमयं प्रकाशवपुः शिवतत्त्वं सर्वभावबीजभूमिः किंचिदुच्छूनतारू
पा तदानंदसेवित शक्तितत्त्वं महेशस्य ज्ञानप्रधानादहमिदमित्यभेदेन पूर्णाहंताचमत्कारः विंदुः सदाशिवतत्त्वं महा
र्थमंजर्यां ज्ञानेक्रियेतिद्वयोरपि प्रथमोन्मेषः सदाशिवोदेवइति अहमिदमिति समष्टतत्त्वलातुटन्यायेन यः स्वात्म-
चमत्कारः स नादः ईश्वरतत्त्वं अत्रापीदंताप्राधान्येनाहंताप्रणीकारेण योहमहमिद‹मिद›मित्येवं चमत्कारोबोधसारत्वाच्छु
द्धविद्यातत्त्वमिति पंचतत्त्वानि शैवनयेषु निर्णीतानि महार्थमंजर्यां ज्ञातत्वधर्म आत्मा तेयस्वभावलोकव्यवहारः
एकरसोसेसदृष्टिं यद्रगतोसा खलनिरूपाविद्येति इत्येषिष्टानां तत्त्वानां कारणप्रसूतिमाह यस्येति अन्येषां कला
दिपर्यंतानां तत्त्वानां प्रथनस्य प्रख्यातेः निर्वेधनाकारणं या माया मीयते परिच्छिद्यते यया तस्याः प्रमातृप्रमेयस्वभा-
वो यया सा माया यस्य परतत्त्वस्य क्रीडाविनोदः तत्किमपि महः अनुत्तरप्रकाशः तेमायामलदूषितस्य तवतमः स्वा

त्माभिन्नपरप्रमातृप्रथाभावमेवकारमस्यतात् स्वप्रकाशप्रथनेनापविहरतात् ८ ॥ सकार्यस्य तत्त्वव्रातस्य निजा-
श्रयात्रयणत्वेन स्वरूपं दर्शयति । षट्त्रिंशन्मयमखिलं प्रमातृजातं यत्किंचिद्यत उदगात्तदात्मकं तत् श्रंभोयाउद-
यति वीचिजालकं यन्नद्भिन्नं किमु भवतीति निश्चितत्वम् ५ । यत्किंचिदखिलं प्रमातृजातं स्वनाश्रितादिब्रह्मान्तं तदाद-
कीटान्तं रुद्रेन्द्रनवर्गं षट्त्रिंशत्तत्त्वरूपं यतः यस्मान्निर्विशेषस्वभावादुदगात् प्रादुरभूत् तत्सर्वं तदात्मकं हेमात्मकं
कटकमिव परतत्त्वस्वभावमेवविकारात्सर्वं तद्भिन्नस्येतरस्याभावादित्यर्थः शिवगीतायां चितो ब्रह्मन्विचित्राणि शरी-
राणीव भूरिशः यत्राणीवतरोर्हि स्त्रिकीयुगादिक्रियेव वेति नन्वयत्तत्सविशेषं तत्कथं निर्विशेषादभिन्नमित्यत्र के श्रुति
कन्यायमुतं दृष्टान्तमाह श्रंभोधाविति निर्विशेषसमुद्रेयज्ञीचिजालकं सविशेषकणतरंगलहर्यादिजातमुदयति
तद्भिन्नं. उदेति तत्सर्वं समुद्रात्पृथक् किमु भवति नेत्यर्थः इति एतत्प्रकारं निश्चितं निश्चयीकुरु अनेन निश्चयेन वेद्याभिन्न
शिवाद्वयबोधस्य विश्रान्तिः स्यादित्यर्थः तथोक्तं इत्थं सर्वविकल्पान् प्रति उद्बोधभावनासमीरणात् आत्मज्योति
षि दीप्ते जुहृन् ज्योतिर्मयो भवतीति ५ ॥ एवमनयासत्यमनन्तरसारवयुतस्य त्वद्रस्त्वं प्रति धावसि पिंडमुत्स्र
ज्यकरेलोष्टीति न्यायवन्नटपिंडः खोतिशयलभ्यं विद्युद्रत्नस्थैर्यमालंभत इति कोऽयं तत्ववेद्याभिन्नपरतत्त्वसंविद्युत्पत्तय
जातेमाह स्थाकोपस्नतमस्य शान्तये वेद्यान्तः परतत्त्वामर्शेन मुचितमित्याशयमाह । यत्कीलैः कचनमिदं वरावरं
यत्संकोचात्पृथगिव भान्त्याणोः स्वशक्तेः उन्मज्जेत्वनरपि मायदर्वेनेन शक्त्यालिङ्गितवपुषं तमर्चयद्राक ९ । यदि

वि
प्र ह्री
५३
53

देहनास्फुरतात्मकं चराचरं स्थावरजंगमात्मकं जगत् यस्य चिदानंदेच्छैकरसमयपरशिवतत्त्वस्य शक्तेस्तत्रयात्मि
कपराशक्तेः कचनं तदभिन्नस्फारः तदुक्तं परमप्रकाशवपुषो विमर्शशक्तिः प्रभोः परा देवी अस्या एव प्रसरः सर्वेन्द्रि
याद्दिकादेयः इति ननु शिवशक्तिमयमेव सर्वं चेत्तर्हि किमस्य संपन्नेत्यादर्शनं न भातीत्याह संकोचादिति आणवाण
वादिमलापहस्तितस्वेच्छे जीवस्य स्वशक्तेः ज्ञानक्रियात्मकनिजसामर्थ्यस्य संकोचात् मितज्ञानमितक्रियारूपज्ञासात
तच्छक्तिकचनात्म जगत् पृथगिव भाति स्पंदे शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम् कलाविलुप्तविभवो गा
तः सन्स पशुः स्मृतः इति इवशब्देन शक्तिरूपमेव वेदनं तद्भिन्नमिच्छादिशक्तीनां तारतम्यतोऽपि समानधर्मत्वादिति सूचितं
तदुक्तं शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वर इति ननु किमस्य प्रज्ञासौकृत्रिम उत कृत्रिमो नाद्यो ऽस्यैव तत्प्रशमा
नुपपत्तेः नानागमवर्णितमुक्त्युपसाधनावाप्तजीवशिवभावस्यानवस्थापत्तेश्चापरस्तु केनोपायेन विरमेदिति तमाह उन्म
ज्जेदिति सा स्वशक्तिः यस्य चिन्मात्रवपुषोऽर्धेनेन वेद्याभिन्नपरामर्शप्रवणेन पुनरपि यथापूर्वं उन्मज्जेद् उद्बुध्येत विज्ञानभै
रवे निराश्रया चितिशक्तिः स्वरूपं दर्शयेन्नत इति नेशत्यालिंगितवपुषं परा भट्टारिका विश्वस्वभावं द्राक् कालाविल
म्बेनैवार्घ्यस्वप्रकाशतया विमर्शय तदुक्तं उपायजालेन शिवे प्रकाशयेद्घटेन किं भाति सहस्रदीधितिः विवेचयन्नि
त्थमुदारदर्शनः स्वयं प्रकाशं शिवमाविशेत्क्षणादिति ८॥ ननु ज्ञाते सर्वं शिवमयमेव तथापि तत्र न लभामि निष्ठा
मिति सापि परमेश्वरशक्तिपातव्यतिरेकेण न लभ्या ततस्तमेव सर्वभावेन शरणं गच्छेति तत्प्रकारं शिक्षयति । उक्तौ

संपरशिवशिल्पिनास्वभित्तौचित्स्फाराच्छुरितमिदंतद्भावचित्रम् अर्पित्वाशुचिकरैस्समर्थयेशतांदृष्टिंवितरयया
तथेदमीक्षे ११ । परशिवशिल्पिनाग्रन्थकारानंदविग्रहपरप्रमातृरूपनिःसामान्यचित्रकारेणस्वभित्तौनिःशेषार्थचित्र
प्रथाधारस्वात्मकुड्येस्वैकरणचक्रान्तर्भवगोचरेभावचित्रंमायाशक्तिकल्पितविभिन्नरूपनीलपीतादिपदार्थलेख्यै
उत्कीर्णेधिलायांसन्निवेशवद्दृष्टंकितं तस्मात्कर्तृकरणक्रियान्तराभावात्सर्वंशिवमयमितिभावः वासिष्ठे स्वचम
त्काररूपेणचित्रमत्रकृतेतिचिति स्वप्रपन्ननिर्माणपातोत्पन्नजगदिति ननुकिमस्यस्वेनसहार्हत्वप्रतीतेरभि-
व्यंजकत्वलक्षणेनिष्पादितेयेनपरामर्शभाजस्तदेकोमजेतइत्यत्रविशेषणमाह चिदिति चित्प्रकाशकचनारंजितं
तद्द्वाराविमर्शनक्षोचितितंतदेकोभजनइतिभावः इत्थंसद्गमानगम्यमिष्टदेवंप्रवेष्टुमवरदानायतदभिगमनं
शिल्पयति शुचीति तत्समावेशोत्कलनरसेनवेद्यमिताहेप्रत्ययदोषात्तत्तीकृताभिःकरणेश्वरीभिस्तेस्वानंदोल्लासस्व
भावमात्मदेवमर्चित्वा तत्तदर्थस्फारेतन्मयतयापर्यालोच्य अर्घ्यंतदर्चनार्थंशरीरास्त्रत्यनोपयोगनिराग्रहकरणा-
र्थिसेपकोऽडइवव्यापारान्तेरैचिन्तत्स्मरतिरूपवरादानायंयाचत्वंविवेचनप्रवणैरभिमतायांनिर्वृत्यानवरलिप्सायांधि-
त्तामाह ईशेति स्वतंत्र निखिलप्रमात्रंतर्गतनियामकत्वानिरवधिचिदानंदैस्वघनिर्भरत्वाचेत्सहात्ममागच्छेत्तवनिषेध-
कारीनकश्चित्स्वतंत्रस्यद्वितीयाभावादितिप्रथमार्थेनसूचितं ननुनिजेतरप्रमातृत्वेदृयं किंतस्यस्वैव शिवएवंकरद्वी
तपश्चभावःस्यागमोमेतितिद्वितीयार्थेनसूचितं सहानेनममसमावेशरस[illegible]पीतिविरोधिवृत्त्यानष्टाभानात्तवनकाचि

वि
प्र टी
५४
54

त्वात्ः पूर्णस्य व्ययाभावादितित्तृतीयार्थेन सूचितं तोलोकालोकयितृत्वविषमदृष्टिस्मृत्यात्वदभिन्नबोधदृष्टिं वितरदे
हि कामितमाह यथेति निर्विशेषदृष्ट्या स्वभावजातं यथा स्वात्मनि त्वयाऽङ्गीकृतं तथाऽहमपश्यामि तदेवबुध्यानवि
युक्तदृशां संजातास्यात्ममेतिभावः स्तोत्रावल्यां सदसत्त्वंभवानेवयेनतेनाप्रयासतः स्वरसेनैवभगवंस्तथासिद्धिः कथं
नमइति ११ ॥ ननु कदाचित्परशिवशक्तिपातेन विद्धहृदयतया वेद्याभिन्नपरतत्त्वस्य परामर्शप्रवणता यदि मम संजा
तास्यात्तर्हि किं संपद्यतेतत्राह । प्रार्चनीयाप्रतिनिजबोधशमिवकर्मीभक्तेच्छयाश्रुतकलनावपुर्महेशः निर्वृतावरणदशाय
दैतताय स्वेच्छया वह्नविनतीः प्रमात्मश्रुतम् १२ । यः निर्विशेषसतत्त्वः महेशः महतां सर्गादिनिर्माणपटूनां मायाधिका
रिणां ब्रह्मरुद्रादीनां तदूर्ध्वीणां शुद्धविद्याधिकारिणामीश्वरादीनां च यईशः निजनिजाधिकारेषु सादित्वेन संयोक्ता
तेन यदीयैश्वर्यविप्रुड्भिरीश्वरीभूताः सपरप्रमाता वार्तिके यस्यैश्वर्यविप्रुड्भिर्ब्रह्मविष्णुशिवादयः ऐश्वर्यवन्तो भा-
न्ति स एवात्मा सदाशिव इति यद्वा महतां सर्वैरर्चनीयं चिदानन्देच्छाज्ञानक्रियापंचकमेव स्वरूपैश्वर्यं यस्य सः तथोक्तं
यः स्फीतः स्फीदयाबोधपरमानन्दसंपदेति प्राचीत् शिवाभिन्नवेद्यविमर्शनीयवेद्याभिन्नशिवं मिनाहंतापमयापिणतया ,,
कलयन्त्यां प्रति निर्वृतं प्रध्वस्तमावरणं स्वस्वरूपगोपनमाणवादिमलत्रयं यस्मात् दशा स्तया यदा शक्तिपातावसरे ईदृतोऽइ
त्याति ननु कस्तत किं न मन्त्रेयमदर्शने सर्वतोविरतस्य युक्तितस्याप्रोपदेशात स्थावसातिरिति तत्राह निजेति निज
त्वादनस्तबोधशमणीप्रकाशानन्दो वर्णस्वरूपं यस्य सः तत्र विश्रान्तिरामानो सर्वतो विषमात्तद्याविवसर्वासानन्दी

नामितिभावः श्रुतिः आधारमानंदमखंडबोधमिति नन्वव्यक्तत्वात्कालादिभिः प्रमातृमशक्यत्वात्कथमीदृग
कर्तृत्वमित्याशंक्याह भक्तेति विमर्शशालिनां स्वतंत्रो निर्वाच्यमतत्त्वस्मात् दृश्येत भूयेत यथास्माकं विमर्शमाहृदे
देति वोढ्रयाह्वतेस्वीकृतं कलनया स्वातंत्र्यशक्त्या वपुर्मूर्त्याकारो येन तमनुग्रहाकारं शिवं वंदे विनतीः देहादिमि
ताहंताशमनमलाऽऽच्छादनविचित्रप्रार्थनाक्रियाः कंतमित्याह प्रमेति यथावस्तु संविदात्मभूतं सारभूतं येन त
स्याः प्रस्तुतिरितिभावः यद्वा प्रमेवात्मा स्वभावो भूतो शेषप्रमेयनिषेधविमर्शादवशिष्टो यस्य तं विततं ब्रह्मेति श्रुतेः
१२ ॥ प्रथमे प्रमाविषयासत्त्वाद्विगतनामरूपं तत्त्वं भक्तिशालिनां हृत्सिद्ध्यचित्तावेशायागमवर्णिताभिः संकोचसंहा
रोन्नरविकासकारिभिस्त्वयोदशाद्भिः प्रकाशसंकाशप्रशस्तनामभिरभिमुखीकुर्वन्निजाख्यातितिमिरोपशमं प्रार्थ
यति । शंभो शंकर शिव शर्व रुद्र शक्तिचक्राधिपक गिरिश उड्डुङ्गशूलिन् भूतेश्वर शरहंस्त्वदप्रथाव्योमग्रमोनि.
जमहसाऽऽहरांतकारे १३ । हे शंभो मायाकालिमाभ्यन्तत्वादन्तरांतराह्लादस्वभाव हे शंकर समावेशशालिनो निजैकव
निष्पादनात्परादृश्यप्रथनात्मश्रेयः कारक हे शिव गर्भीकृतविश्वत्वाच्चिदानंदेच्छाज्ञानक्रियासामरस्यस्वरूप हे शर्व.
भक्तानां वेद्यसंस्कारसंहरणकाले शक्तिपातकृतितया देहाद्यहंप्रमातृत्वविहिंसक हे रुद्र परप्रकाशस्फुरणाद्व्योमा
त्मकविरोगद्रावक हे शक्तिचक्राधिपक निःशेषशक्तिप्रसरभूमि खेचर्यादिशक्तिचक्रस्फारक तदक्षं खेच
रीगोचरीवाग्दिक्चरीभूचरीभिदा परादिभारतीसंस्थं शक्तिचक्रं चतुष्पम आनंदेच्छाज्ञानक्रियास्थं वैखर्यादिरूप

वि
प्र टी
५५
55

हृद्यमिति । हे गिरिश गिरिकाधिशेत इति विग्रहे गौरपरालिंगितमूर्ते हे इंदुचूड, चेद्रसहस्पृशचरमसादात्मकारस्फूर्तिप्रधा-
नेद्रेक्ष्वलिन्, स्वातंत्र्यशक्तिभित्तरूकितेच्छाज्ञानक्रियात्रयोल्लासितशूलधारिन् हे भूतेश भवनधर्मसदाशिवादिधरां-
ततत्वव्रातनियामक, ईश्वर सर्वत्र स्वतंत्र हे हर हन् मूर्यतेस्मिन्नपुण्यमित्यत्वादिनानानर्थ्येऽन्नेदं तत्त्वैरेमायाख्येतद्भंजकत्रिङ
शूलित्वात् द्विविधोल्लासितजाग्रदादिपुरत्रयभंजक वा हे ईश्वरेतकारेनिजभक्तवात्सल्यख्यापनाय कालान्तक तव चित्स्वामिनः
स्वप्रथास्वख्यातिरेव नानादुःखबीजभेदवैचित्र्यसंकुलत्वात् स्वपुरुषत्वलक्षितेमोक्षभरणागतं निजमहसा सर्वोत्कृष्टनिर्मल
प्रकाशेन उद्धर परमानंदपयास्त्वमयमितप्रकाशभासितमहत्त्वाएतत्स्थवत्केदस्यपरप्रकाशरूपतयोमिथ्याप्रत्यय
त्वाच्छेदृश्यवदिति भावः स्तवचिंतामण्यै अहो निःसीमो भीमो घोरः संसारसागरः अहो तत्तरणोपायः परः कोऽपि महेश्व
र इति १३ ॥ अहो कोयं मे दुष्कृतपरिपाको येन सर्वसामान्यस्य तव शक्तिपातस्यायोग्योऽयं न भवामीति स्तूयते । विश्वं
संहरसि हरानिखिलं निर्जातः संवर्तेप्रभ्रसितद्विधान्नमीश स्वात्मात्मकमलमात्रमार्जने भोने शास्त्वं निजमहसानुगाम
किं मे १४ । हे हरप्राकृतनामलमकृतसंस्कारात्मचिंतनविवशमनस्तया निःशेषकल्मषप्रशमकरसंवर्तेप्रलयका-
लेऽग्निवलेन द्रस्तेऽतत्स्वरूपेविश्वं निर्जातः स्वात्मचिद्रसगर्भे संहरसि तदेकदेशं नयसि हे ईश सर्वत्र स्वतंत्र तन्निखिलवि-
श्वसंहारं विधातृ निजशक्तिनिर्मितं प्रभुःसमर्थः असि केवलचित्प्रकाशैकरसवपुरवशिष्यसे हे भो चिन्नाथ अनुगा-
स्यसर्वस्यफलत्वतात्मदर्शनात्तजन्यमितमत्वमपहाय शरणागतत्वच्चरणपंकजयुगलमापन्नं मां स्वात्मात्मकमल

स्वीकृताशेषविश्वस्वप्रकाशानंदवपुषस्तवाख्यातिरप्रथनमेवात्मकं स्वरूपं यस्य मलस्याणवादिकालिमा-
लेशस्य मार्जने पटुस्तेन निजमहसा स्वीयानंतप्रकाशेन किं न ईशः अपि तु समर्थ एव न न्वपास्तराहित्यात्तदपाकृ-
ताविच्छाऽनुत्थाने ममैव दौर्भाग्यमत्रेत्याहेति संबोधनेन कृतमपूर्णतया वांछा किं नो इच्छेत्तदपहस्तताविनिभावः स्तोत्रावर्ह्यो
महाप्रकाशवपुषि विस्पष्टं भवति स्थिते सर्वतोपीशतत्त्वस्मान्नमसि प्रसराम्परमिति ॥ ४४ ॥ यस्त्वमभवदप्रथाम्न
लोनर्यहृष्णस्तस्य शांतिर्भवत्वप्रथा यत्नेव प्रथाप्रथयोरन्योन्यविरोधाद्धेतुकृष्ठनित्यानंदनिर्भरमहेश्वर भवेयं रागद्वेषाभा
वात्सर्वत्रसमतत्त्वस्य तव तत्रयथापूर्यादेवादीनां तथा नस्यादित्याशयभाजो व्यवद्धाः प्रार्थनायावत्प्रकाशसमाप्तिविर
चयति । कालोयं नयति विभो द्रुतासदो मां स्खलितं दर्शयत्वमगां निजं सुखें ३ माकृथीः परिभवमत्र कातरतिले जी-
वामीक्ष्व शरणागते ष्टकारिन् ४५ । हे विभो कटकारे देहमवदंतर्वहिश्चितिशक्त्या निःशेषव्यापकश्रयं भवत्पराम
र्शावेश व्योजृंभमाणः कालः लवादिश्ववाहनिर्वाहेण सर्वायुर्व्ययकारी प्राक्तनकिंचिद्दारसुकृतफलोन्मुखोन्न
त्वार्थनापरं मां नयति निःसीममहेत्यतिसरणिगर्भितजन्मस्वादिदशानुभवयद्धः खावलिवशतामापादयति भर्तर्द्व
विणा किं युक्तं महसाऽपेतिव लवात्कालः कृतांतोतसमीति नत निजोऽपसवलेन जेतुमुख्यतं किं न संपदयसरस्याशे
क्तयाह द्रुतासदश इति त्वच्छक्तिपातमंतरेण न केनापि जेतुमाश्रितः सर्वथोल्वणस्य महाप्रकाशवपुषो महालवास-
नाकस्य कालस्यात्यंतमभिन्नाव्यतिरेकेणाकस्य चित्प्रमातृरसंतात् चित्प्रमेयवर्गांत्तुपौनिमग्नत्वाजेतत्वे किं प्रसक्तेयत य

शि
प्र टी
५६
56

स्याभावः सतस्थितियोगीतिन्यायत्वादतः कालांतकस्यागमद्विडिमखोषितनाम्नात्वयैवतज्जयोभवेदित्याशयंक्रोडीकृ
त्य साक्रोशमाहूयति हेस्फुलिन् भ्रातीनां कालकृतविचित्रकल्पितदशाभंजनायत्रिशूलधारिण् स्वभगेपरमानंदरः
सोल्वणत्वेन सर्वेषामाशंस्येनिजं नित्योदितत्वादसामान्यसुखेदुःशैवीशुखमिहोच्यतइतिनयोक्तरीत्यापरतत्वप्रकाशः
केव्युत्थानतमोपहारकं परापरशक्तिचंद्रमसंदर्शय निःसारवैयारोपमितांहेतांप्रहाणायप्रकटय स्तवचिंतामणौ किमशा
क्तः करोमीति सर्वज्ञानथ्यवसितः सर्वोत्र्याह्निकाशक्तिःशंकरीशरणंममेति अथनैवव्युत्थाननिर्माणनिधानस्यकाल
स्यजयोममभवेतिसूचितं पुनरपिमदोत्रभयदंकालगतिमाकलयन्नस्खलितगिराह सेति अत्र नित्यसुखदर्शनेपरिभ
वमनादरंकालदेयेमाकुर्याः कृपातिरेकान्मामविपेहि नत्वनाहंदर्शयामीतिचेत्तत्राह केति चिदेकरसत्वादिकृतिस्थस्य
स्यतवकालकृतिःकाहानिः प्रतियोगिपर्मत्वान्नविकृतिरित्यर्थः स्पंदे जाग्रदादिविभेदेपितदभिन्नेप्रसर्पति निवर्ततेनिजा
न्नैवस्वभावादुपलब्धृतइति नत्वतेनकिंफलंभवेत्तत्राह जीवामीति तदीक्षणमात्रात्कालकृतषड्भावविकारः
शून्यंभवामीत्यर्थः तदुक्तं तदेवसर्वःकालोस्यत्वदानंदेनप्रर्थ्यतइति नत्वसदुपासदोषामपि निरुन्ध्यादितिचेन्नतस्यस्वतः
